वासरत्रयमम्लेन ततः खल्वे विनिःक्षिपेत् ॥
मार्द्धांशं सूतकं दत्त्वा याममम्लेन मर्द्दयेत् ।
तत उद्धृत्य पत्राणि लेपयेद्द्विगुणेन च ।
गन्धकेनाम्लपृष्टेन तस्य कुर्य्याच्च गोलकम् ॥
ततः पिष्ट्वा च मीनाक्षीं चाङ्गेरीं सपुनर्नवाम् ।
तत्कल्केन बहिर्गोलं लेपयेदङ्गुलोन्मितम् ॥
धृत्वा तद्गोलकं भाण्डे शरावेण च रोधयेत् ।
वालुकाभिः प्रपूर्य्याथ विभूतिलवणाम्बुभिः ॥
दत्त्वा भाण्डमुखे मुद्रां ततश्चुल्ल्यां विपाचयेत् ।
क्रमवृद्धाग्निना सम्यक् यावद्यामचतुष्टयम् ॥
स्वाङ्गशीतं समुद्धृत्य मर्द्दयेत् शूरणद्रवैः ।
यामैकं गोलकं तच्च निःक्षिपेत् शूरणोदरे ॥
मृदा लेपस्तु कर्त्तव्यः सर्व्वतोऽङ्गुलमात्रकः ।
पाच्यं गजपुटे चित्रं मृतं भवति निश्चितम् ॥
वमनञ्च विरेकञ्च भ्रमं क्लममथारुचिम् ।
विदाहं स्वेदमुत्क्लेदं न करोति कदाचन ॥”
इति भावप्रकाशः ॥ * ॥

शुल्वनिभः । अरुणवर्णः । इति हेमचन्द्रः शब्दरत्नावली च ॥ तद्वति, त्रि ॥
(“न विषं विषमित्याहुस्ताम्रञ्च विषमुच्यते ।
एकदोषो विषे सम्यक् दोषास्ताम्रे प्रकीर्त्तिताः ॥
भ्रमो मूर्च्छा विदाहश्च उत्क्लेदशोषवान्तयः ।
अरुचिश्चित्तसन्ताप एते दोषा विषोपमाः ॥
तस्माद्विशुद्धं ताम्रं हि ग्राह्यं रोगोपशान्तये ।
पटुना रविदुग्धेन ताम्रपत्राणि लेपयेत् ॥
अग्नौ सन्ताप्य निर्गुण्डीरसे सिञ्चेत् पुनः पुनः ॥
मतान्तरम् ।
गोमूत्रेण पचेद्यामं ताम्रपत्रं दृढ़ाग्निना ।
शुध्यते नात्र सन्देहो मारणञ्चात्र कथ्यते ॥
इति ताम्रशोधनम् ॥ * ॥
अथ ताम्रमारणम् ।
सूतमेकं द्विधा गन्धं यामं मर्द्दन्तु कन्यया ।
द्वयोस्तुल्यं ताम्रपत्रं लिप्त्वा स्थाल्यां निधापयेत् ।
सम्यक् शरावकैः सार्द्धं पार्श्वे भस्म निधापयेत् ।
चतुर्यामं पचेच्चुल्ल्यां पात्रपृष्ठे सगोमये ॥
जलं पुनः पुनर्द्देयं स्वाङ्गशीतं विमर्द्दयेत् ।
म्रियते नात्र सन्देहः सर्व्वरोगेषु योजयेत् ॥
मतान्तरम् ।
जम्बाम्भसा सैन्धवसंयुतेन
सगन्धकं स्थापय शुल्वपत्रम् ।
पक्वायमानं पुटयेत् सुयुक्त्या
वातादिकं यावदुपैति शान्तिम् ॥
अन्यतरमतम् ।
शुद्धं ताम्रदलं विमर्द्द्य पटुना क्षारेण जम्बीरजे
नीरे चैकमिदं स्नुह्यर्कपयसा लिप्तं धमेत् सप्तधा ।
निर्गुण्ड्यम्बुहिमं रसेन्द्रकलितं दुग्धाज्यगन्धेन तत्
तुल्येनाथ मृतं भवेत् सुपठितं पञ्चामृतेन त्रिधा ॥
गुणा यथा,—
वान्तिभ्रान्तिविवर्ज्जितं क्षयरुजाकुष्ठानि
पाण्ड्वामयं
शूलं मेहगुदाङ्कुरानिलगदाशुक्लाशुपार्श्वे जयेत् ।
गुञ्जामात्रमिदन्त्वतो द्विगुणितं तत्क्षुद्रकायेन चेत्
भुक्तः स्थौल्यजरापमृत्युशमनं पथ्याशिना वत्सरात् ॥
ताम्रसुधां गरहरं यकृत्प्लीहोदरापहम् ।
क्रिमिशूलामवासन्नं ग्रहण्यर्शोऽम्लपित्तजित् ॥”
इति ताम्रमारणम् ॥ * ॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

ताम्रः, पुं, (ताम्रस्येव वर्णोऽस्त्यस्य । अच् । ताम्रवर्णत्वादस्य तथात्वम् ।) कुष्ठरोगविशेषः । इति कर्म्मविपाकः ॥ (द्वीपभेदः । यथा, महाभारते । २ । ३१ । ६५ ।
“द्वीपं ताम्राह्वयञ्चैव पर्व्वतं रामकं तथा ॥”)

ताम्रकं, क्ली, (ताम्र + स्वार्थे संज्ञायां वा कन् ।) ताम्रम् । इत्यमरः । २ । ९ । ९७ ॥

ताम्रकर्णी, स्त्री, (ताम्रवर्णौ कर्णौ यस्याः स्त्रियां ङीष् ।) अञ्जना नाम पश्चिमदिग्हस्तिपत्नी । इत्यमरः । १ । ३ । ५ ॥

ताम्रकारः, पुं, (ताम्रं करोति ताम्रधातुभिः पात्रादिकं निर्म्मातीति । कृ + अण् ।) वर्णसङ्करजातिविशेषः । तत्पर्य्यायः । ताम्रिकः २ शौल्विकः ३ ताम्रकुट्टकः ४ । इति शब्दरत्नावली ॥ अस्योत्पत्तिः कंसकारशब्दे द्रष्टव्या ॥

ताम्रकुट्टकः, पुं, (ताम्रं कुट्टयतीति । कुट्ट + ण्वुल् ।) ताम्रकारः । इत्यमरः । २ । १० । ८ ॥

ताम्रकूटः, पुं क्ली, (ताम्रनिर्म्मितं कूटमिव ताम्रस्य कूटमिव वा ।) क्षुपविशेषः । तामाक् इति भाषा । यथा,—
“सम्बिदा कालकूटञ्च ताम्रकूटञ्च धुस्तुरम् ।
अहिफेनं खर्ज्जूरसः तारिका तरिता तथा ॥
इत्यष्टौ सिद्धिद्रव्याणि यथा सूर्य्याष्टकं प्रिये ॥”
इति कुलार्णवतन्त्रम् ॥

ताम्रक्रिमिः, पुं, (ताम्रवर्णः क्रिमिः कीटः ।) इन्द्रगोपकीटः । इति भूरिप्रयोगः हारावली च ॥

ताम्रगर्भं, क्ली, (ताम्रं गर्भं उत्पत्तिस्थानमस्य ।) तुत्थम् । इति राजनिर्घण्टः ॥

ताम्रचूड़ः, पुं स्त्री, (ताम्रा ताम्रवर्णा चूड़ा अस्य ।) कुक्कुटः । इत्यमरः । २ । ५ । १७ ॥ (यथा, महाभारते । ३ । २२४ । २४ ।
“अपरं गामिदायादस्ताम्रचूड़ं मुखेन सः ।
महाकायमुपश्लिष्टं कुक्कुटं बलिनां वरम् ॥”
यथा चोत्तरतन्त्रे ३९ अध्याये सुश्रुतेनोक्तम् ।
“ताम्रचूड़स्य मांसेन पिबेद्वा मद्यमुत्तमम् ॥”)
कुकुरद्रुः । इति राजनिर्घण्टः ॥

ताम्रदुग्धा, स्त्री, (ताम्रं रक्तवर्णं दुग्धं क्षीरं रसोऽस्याः ।) गोरक्षदुग्धा । इति राजनिर्घण्टः ॥

ताम्रपट्टं, क्ली, (ताम्रेण निर्म्मितं पट्टं पत्रम् ।) ताम्रनिर्म्मितलेखनपत्रम् । यथा,—
“दत्त्वा भूमिं निबन्धं वा कृत्वा लेख्यन्तु कारयेत् ।
आगामिभद्रनृपतिः परिज्ञानाय पार्थिवः ॥
पटे वा ताम्रपट्टे वा समुद्रोपरिचिह्नितम् ॥”
इति मिताक्षरा ॥

ताम्रपत्रः, पुं, (ताम्रं ताम्रवर्णं पत्रमस्य ।) जीवशाकः । इति राजनिर्घण्टः ॥ ताम्रनिर्म्मितपत्रे, क्ली ॥

ताम्रपर्णी, स्त्री, दीर्घिकाभेदः । इति भूरिप्रयोगः ॥ नदीविशेषः । इति पुराणम् ॥ (यथा, रघुः । ४ । ५० ।
“ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ॥”)

ताम्रपल्लवः, पुं, (ताम्रवर्णं पल्लवमस्य ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—
“अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

ताम्रपाकी, [न्] पुं, (पच्यते इति । पच + घञ् कुत्वञ्च । ताम्रः ताम्रवर्णः पाकः परिणतिरस्यस्येति । इनिः ।) गर्द्दभाण्डवृक्षः । इति रत्नमाला ॥

ताम्रपादी, स्त्री, (ताम्रौ रक्तवर्णौ पादौ मूलदेशौ अस्याः ।) हंसपदी । इति राजनिर्घण्टः ॥ (हंसपदीशब्दे विवृतिरस्या ज्ञातव्या ॥)

ताम्रपुष्पः, पुं, (ताम्रवर्णं पुष्पमस्य ।) रक्तकाञ्चनः । इति जटाधरः ॥ (अस्य पर्य्यायाः यथा भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।
“कोविदारश्चमरिकः कुद्दालो युगपत्रकः ।
कुण्डली ताम्रपुष्पश्च स्वान्तकः स्वल्पकेशरी ॥”)
भूमिचम्पकः । इति शब्दचन्द्रिका ॥

ताम्रपुष्पिका, स्त्री, (ताम्रवर्णं पुष्पमस्याः । कप् टापि अत इत्वञ्च ।) रक्तत्रिवृत् । इति राजनिर्घण्टः ॥ (रक्तत्रिवृत्शब्दे ज्ञातव्यमस्या विवरणम् ॥)

ताम्रपुष्पी, स्त्री, (ताम्रवर्णं पुष्पमस्या इति । ङीष् ।) धातकी । (अस्याः पर्य्याया यथा,—
“धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा ।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
पाटलावृक्षः । इति राजनिर्घण्टः ॥ (पर्य्यायाः यथा,—
“पाटलिः पाटला मोघा मधुदूती फलेरुहा ।
कृष्णवृन्ता कुबेराक्षी कालस्थाल्यलिवल्लभा ॥
ताम्रपुष्पी च कथिता परा स्यात् पाटला सिता ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

ताम्रफलः, पुं, (ताम्रं ताम्रवर्णं फलमस्य ।) अङ्कोटवृक्षः । इति राजनिर्घण्टः ॥

ताम्रमूला, स्त्री, (ताम्रं ताम्रवर्णं मूलमस्याः ।) दुरालभा । (यथा, भावप्रकाशे । ज्वराधिकारे श्वासचिकित्सायाम् ।
“सिंही व्याघ्री ताम्रपर्णी पटोली ॥”)
लज्जालुः । इति राजनिर्घण्टः ॥ कच्छुरा । इति रत्नमाला ॥ खिराइ इति भाषा ॥

ताम्रवर्णः, पुं, (ताम्रस्येव वर्णोऽस्य ।) पक्षिशाहलयम् । इति राजनिर्घण्टः ॥ (भारतवर्षीयद्वीपभेदः । यथा, मात्स्ये । ११३ । ८ ।